## विभाषा कृञि । (७२/७७३)

अन्तर्धौ इति वर्तते । प्राप्तविभाषेयम् । तिरःशब्दः करोतौ [1]परतो विभाषा गतिसञ्ज्ञो भवति । तिरः कृत्य, तिरस्कृत्य (८.३.४२/१५६) । तिरस्कृतम् । [2]यत्तिरस्करोति । तिरः कृत्वा, तिरस्कृत्वा । अन्तर्धौ [3]इत्येव, तिरःकृत्वा [4]काष्ठं तिष्ठति ॥

## उपाजेऽन्वाजे । (७३/७७४)

विभाषा कृञि इति वर्तते । उपाजेऽन्वाजेशब्दौ विभक्तिप्रतिरूपकौ निपातौ [5]दुर्बलस्य सामर्थ्याधाने [6]वर्तेते । तौ कृञि विभाषा गतिसञ्ज्ञौ भवतः । उपाजेकृत्य, उपाजे कृत्वा । अन्वाजेकृत्य, अन्वाजे कृत्वा ॥

## साक्षात्प्रभृतीनि च । (७४/७७५)

विभाषा कृञि इति वर्तते । साक्षात्प्रभृतीनि शब्दरूपाणि कृञि विभाषा गतिसञ्ज्ञानि भवन्ति ।

[७२] साक्षात्प्रभृतिषु च्व्यर्थवचनम्[7] । (म.भा. १. ३४४)

साक्षात्कृत्य, साक्षात् कृत्वा । मिथ्याकृत्य, मिथ्या कृत्वा ।

साक्षात् । मिथ्या । [8]चिन्ता । भद्रा । [9]लोचना । [10]विभाषा । सम्पत्का । आस्था । अमा[11] । श्रद्धा । प्राजर्या । प्राजरुहा । [12]वीजर्या । बीजरुहा । संसर्या[13] । अर्थे । लवणम् । उष्णम् । शीतम् । उदकम् । आर्द्रम् । गतिसञ्ज्ञासंनियोगेन लवणादीनां मकारान्तत्वं निपात्यते । [14]अग्नौ । वशे । [15]विकम्पने । [16]विहसने । [17]प्रहसने । प्रतपने । प्रादुस् । [18]नमस् । आविस्[19] ॥

## अनत्याधान उरसिमनसी । (७५/७७६)

विभाषा कृञि इति वर्तते । अत्याधानम् [20]उपश्लेषणम्, तदभावेऽनत्याधाने उरसिमनसी शब्दौ विभाषा कृञि गतिसञ्ज्ञौ भवतः । उरसिकृत्य, उरसि कृत्वा । [21]मनसिकृत्य, मनसि कृत्वा । अनत्याधाने इति किम्? उरसि कृत्वा पाणिं शेते ॥

## मध्ये पदे निवचने च । (७६/७७७)

विभाषा कृञि इति वर्तते । चकारात् अनत्याधाने इति च । मध्ये पदे निवचने इत्येते शब्दा अनत्याधाने विभाषा कृञि गतिसञ्ज्ञा भवन्ति । मध्येकृत्य, मध्ये कृत्वा । पदेकृत्य, पदे कृत्वा । निवचनं वचनाभावः । निवचनेकृत्य, निवचने कृत्वा । वाचं नियम्य [22]इत्यर्थः । अनत्याधाने इत्येव, हस्तिनः पदे कृत्वा शिरः शेते ॥

---

1. परतो नास्ति ड.फ. 2. उदाहरणमिदं नास्ति ड.फ. 3. किम् फ. 4. काण्डं गतः क, काष्ठं नास्ति ह. 5. दुर्बलसामर्थ्याधाने अ. 6. वर्तते ह. 7. द्रष्टव्यम् इत्यधिकम् क. 8. चिन्ना क. 9. चलना रोचना ड. 10. विभाषा संपत्का नास्ति क. 11. नास्ति ब, आम अर्धा ड. 12. बीजर्या बीजरुहा क. 13. आम् इत्यधिकम् ब. 14. आः ह. 15. विकसने ब. 16. नास्ति ब. 17. प्रगदे प्रर्हने प्रमादे ह, प्रहसने नास्ति क. 18. मनस् ब. 19. इति साक्षादादिः इत्यधिकम् ड. 20. उपश्लेषः ह. 21. उदाहरणमिदं नास्ति फ. 22. इत्यर्थः नास्ति ब.